# श्री विभीषण कृत हनुमत स्तोत्रं

नमो हनुमते तुभ्यं नमो मारुतसूनवे |
नम: श्री रामभक्ताय श्यामास्याय च ते नम: || १ ||

नमो वानरवीराय सुग्रीव सख्यकारिणे |
लङ्का विदाहनार्थाय हेलासागर तारिणे || २ ||

सीताशोक विनाशाय राममुद्राधराय च |
रावणान्तकुलच्छेद कारिणे ते नमो नम: || ३ ||

मेघनाद मखध्वंस कारिणे ते नमो नम: |
अशोकवन विध्वंसकारिणे भयहारिणे || ४ ||

वायुपुत्राय वीराय आकाशोदर गामिने |
वनपालशिरश्छेद लङ्का प्रासादभञ्जिने || ५ ||

ज्वलत्कनक वर्णाय दीर्घलाङ्गूल धारिणे |
सौमित्रिजयदात्रे च रामदूताय ते नम: || ६ ||

अक्षस्य वधकत्र्रे च ब्रह्मपाशनिवारिणे |
लक्ष्मणाङ्ग महाशक्तिघातक्षत विनाशिने || ७ ||

रक्षोघ्राय रिपुघनय भूतघनय च ते नम: |
ऋक्षवानर वीरौघ प्राणदाय नमो नम: || ८ ||

परसैन्य बलघनय शस्त्रास्त्र घनय ते नम: |
विषघनय द्विषघनय ज्वरघनय च ते नम: || ९ ||

महाभय रिपुघनय भक्तत्राणैक कारिणे |
परप्रेरित मन्द्राणां यन्द्राणां स्तम्भकारिणे || १० ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

पय:पाषाणतरणकारणाय नमो नम: |
बालार्क मण्डल ग्रास कारिणे भवतारिणे || ११ ||

नखायुधाय भीमाय दन्तायुधधराय च |
रिपुमाया विनाशाय रामाज्ञा लोकरक्षिणे || १२ ||

प्रतिग्राम स्थितायाथरक्षोभूत वधार्थिने |
करालशैल शस्त्राय द्रुमशस्त्राय ते नम: || १३ ||

बालैक ब्रह्मचर्याय रुद्रमूर्तिधराय च |
विहंगमाय सर्वाय वज्रदेहाय ते नम: || १४ ||

कौपीनवाससे तुभ्यं रामभक्तिरताय च |
दक्षिणाशा भास्कराय शत चन्द्रोदयात्मने || १५ ||

कृत्याक्षतव्यथाघनय सर्वकेश हराय च |
स्वाम्याज्ञापार्थ संग्राम संख्ये संजयधारिणे || १६ ||

भक्तान्त दिव्यवादेषु संग्रामे जयदायिने |
किल्किलाबुबुकोच्चार घोर शब्द कराय च || १७ ||

सर्पाग्निव्याधि संस्तम्भ कारिणे वनचारिणे |
सदा वनफलाहार संतृप्ताय विशेषत: || १८ ||

महार्णव शिलाबद्ध सेतुबन्धाय ते नम: |
वादे विवादे संग्राम भये घोरे महावने || १९ ||

सिंहव्याघ्रादि चौरेभ्य: स्तोत्र पाठद्भयं न हि |
दिव्ये भूतभये व्याधौ विषे स्थावर जङ्गमे || २० ||



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

www.viswakalyanam.org

राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च |
जले सर्वे महावृष्टौ दुर्भिक्षे प्राणसम्पवे || २१ ||

पठेत् स्तोत्रं प्रमुच्येत भयेभ्य: सर्वतो नर: |
तस्य क्वापि भयं नास्ति हनुमत्स्तव पाठत: || २२ ||

सर्वदा वै त्रिकालं च पठनीयमिदं स्तवम् |
सर्वान् कामानवापनेति नात्र कार्या विचारणा || २३ ||

विभीषण कृतं स्तोत्र ताक्ष्येण समुदीरितम् |
ये पठिष्यन्ति भक्त्या वै सिद्ध्यस्तत्करे स्थिता || २४ ||

**इति श्री विभीषण कृत हनुमत स्तोत्रं सम्पूर्ण**

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133